# दुर्गास्तवः

सन्नद्धसिंहस्कन्धस्थां स्वर्णवर्णां मनोरमाम् ।
पूर्णेन्दुवदनां दुर्गां वर्णयामि गुणार्णवाम् ॥ १॥

किरीटहारग्रैवेयनूपुराङ्गदकङ्कणैः ।
रत्नकाञ्च्या रत्नचित्रकुचकञ्चुकतेजसा ॥ २॥

विराजमाना रुचिराम्बरा किङ्किणिमण्डिता ।
रत्नमेखलया रत्नवासोपरि विभूषिता ॥ ३॥

वीरशृङ्खलया शोभिचारुपादसरोरुहा ।
रत्नचित्राङ्गुलीमुद्रारत्नकुण्डलमण्डिता ॥ ४॥

विचित्रचूडामणिना रत्नोद्यत्तिलकेन च ।
अनर्घ्यनासामणिना शोभिताऽऽस्यसरोरुहा ॥ ५॥

भुजकीर्त्या रत्नचित्रकण्ठसूत्रेण चाङ्किता ।
पद्माक्षिणी सुबिम्बोष्ठी पद्मगर्भादिभिः स्तुता ॥ ६॥

कबरीभारविन्यस्तपुष्पस्तबकविस्तरा ।
कर्णनीलोत्पलरुचा लसद्भ्रूमण्डलत्विषा ॥ ७॥

कुन्तलानां च सन्तत्या शोभमाना शुभप्रदा ।
तनुमध्या विशालोरःस्थला पृथुनितम्बिनी ॥ ८॥

चारुदीर्घभुजा कंबुग्रीवा जङ्घायुगप्रभा ।

असिचर्मगदाशूलधनुर्बाणाङ्कुशादिना ॥ ९ ॥

वराभयाभ्यां चक्रेण शङ्खेन च लसत्करा ।
दंष्ट्राग्रभीषणास्योत्थहुङ्कारार्दितदानवा ॥ १० ॥

भयङ्करी सुरारीणां सुराणामभयङ्करी ।
मुकुन्दकिङ्करी विष्णुभक्तानां मौक्तशङ्करी ॥ ११ ॥

सुरस्त्रीकिङ्करीभिश्च वृता क्षेमङ्करी च नः ।
आदौ मुखोद्गीर्णनानाऽऽम्नाया सर्गकरी पुनः ॥ १२ ॥

निसर्गमुक्ता भक्तानां त्रिवर्गफलदायिनी ।
निसु(शु)म्भसु(शु)म्भसंहर्त्री महिषासुरमर्दिनी ॥ १३ ॥

तामसानां तमःप्राप्त्यै मिथ्याज्ञानप्रवर्तिका ।
तमोभिमानिनी पायाद्दुर्गा स्वर्गापवर्गदा ॥ १४ ॥

इमं दुर्गास्तवं पुण्यं वादिराजयतीरितम् ।
पठन्विजयते शत्रून्मृत्युं दुर्गाणि चोत्तरेत् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितः

दुर्गास्तवः सम्पूर्णः

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु